श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे पञ्चमोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे पञ्चमोऽध्यायः ॥

ऋषभ उवाच
नायं देहो देहभाजां नृलोके
    कष्टान् कामानर्हते विड्भुजां ये।
तपो दिव्यं पुत्रका येन सत्त्वं
    शुद्ध्येद्यस्माद् ब्रह्मसौख्यं त्वनन्तम् ॥ **1** ॥

महत्सेवां द्वारमाहुर्विमुक्ते -
    स्तमोद्वारं योषितां सङ्गिसङ्गम्।
महान्तस्ते समचित्ताः प्रशान्ता
    विमन्यवः सुहृदः साधवो ये ॥ **2** ॥

ये वा मयीशे कृतसौहृदार्था
    जनेषु देहम्भरवार्तिकेषु।
गृहेषु जायात्मजरातिमत्सु
    न प्रीतियुक्ता यावदर्थाश्च लोके ॥ **3** ॥

नूनं प्रमत्तः कुरुते विकर्म
    यदिन्द्रियप्रीतय आपृणोति।
न साधु मन्ये यत आत्मनोऽय -
    मसन्नपि क्लेशद आस देहः ॥ **4** ॥

पराभवस्तावदबोधजातो
    यावन्न जिज्ञासत आत्मतत्त्वम्।
यावत्क्रियास्तावदिदं मनो वै
    कर्मात्मकं येन शरीरबन्धः॥ 5॥

एवं मनः कर्मवशं प्रयुङ्क्ते
    अविद्ययाऽऽत्मन्युपधीयमाने।
प्रीतिर्न यावन्मयि वासुदेवे
    न मुच्यते देहयोगेन तावत्॥ 6॥

यदा न पश्यत्ययथा गुणेहां
    स्वार्थे प्रमत्तः सहसा विपश्चित्।
गतस्मृतिर्विन्दति तत्र तापा -
    नासाद्य मैथुन्यमगारमज्ञः॥ 7॥

पुंसः स्त्रिया मिथुनीभावमेतं
    तयोर्मिथो हृदयग्रन्थिमाहुः।
अतो गृहक्षेत्रसुताप्तवित्तै -
    र्जनस्य मोहोऽयमहं ममेति॥ 8॥

यदा मनोहृदयग्रन्थिरस्य
    कर्मानुबद्धो दृढ आश्लथेत।
तदा जनः सम्परिवर्ततेऽस्माद्
    मुक्तः परं यात्यतिहाय हेतुम्॥ 9॥

हंसे गुरौ मयि भक्त्यानुवृत्या
    वितृष्णया द्वन्द्वतितिक्षया च।
सर्वत्र जन्तोर्व्यसनावगत्या
    जिज्ञासया तपसेहानिवृत्त्या॥ 10॥

मत्कर्मभिर्मत्कथया च नित्यं
मद्देवसङ्गाद् गुणकीर्तनान्मे।
निर्वैरसाम्योपशमेन पुत्रा
जिहासया देहगेहात्मबुद्धेः॥ **11** ॥

अध्यात्मयोगेन विविक्तसेवया
प्राणेन्द्रियात्माभिजयेन सध्र्यक्।
सच्छ्रद्धया ब्रह्मचर्येण शश्व -
दसम्प्रमादेन यमेन वाचाम्॥ **12** ॥

सर्वत्र मद्भावविचक्षणेन
ज्ञानेन विज्ञानविराजितेन।
योगेन धृत्युद्यमसत्त्वयुक्तो
लिङ्गं व्यपोहेत्कुशलोऽहमाख्यम्॥ **13** ॥

कर्माशयं हृदयग्रन्थिबन्ध -
मविद्ययाऽऽसादितमप्रमत्तः।
अनेन योगेन यथोपदेशं
सम्यग्व्यपोह्योपरमेत योगात्॥ **14** ॥

पुत्रांश्च शिष्यांश्च नृपो गुरुर्वा
मल्लोककामो मदनुग्रहार्थः।
इत्थं विमन्युरनुशिष्यादतज्ज्ञान्
न योजयेत्कर्मसु कर्ममूढान्।
कं योजयन्मनुजोऽर्थं लभेत
निपातयन्नष्टदृशं हि गर्ते॥ **15** ॥

लोकः स्वयं श्रेयसि नष्टदृष्टि -
र्योऽर्थान् समीहेत निकामकामः।

अन्योन्यवैरः सुखलेशहेतो -
रनन्तदुःखं च न वेद मूढः ॥ **16** ॥

कस्तं स्वयं तदभिज्ञो विपश्चिद्
अविद्यायामन्तरे वर्तमानम्।
दृष्ट्वा पुनस्तं सघृणः कुबुद्धिं
प्रयोजयेदुत्पथगं यथान्धम् ॥ **17** ॥

गुरुर्न स स्यात्स्वजनो न स स्यात्
पिता न स स्याज्जननी न सा स्यात्।
दैवं न तत्स्यान्न पतिश्च स स्या -
न्न मोचयेद्यः समुपेतमृत्युम् ॥ **18** ॥

इदं शरीरं मम दुर्विभाव्यं
सत्त्वं हि मे हृदयं यत्र धर्मः।
पृष्ठे कृतो मे यदधर्म आराद्
अतो हि मामृषभं प्राहुरार्याः ॥ **19** ॥

तस्माद्भवन्तो हृदयेन जाताः
सर्वे महीयांसममुं सनाभम्।
अक्लिष्टबुद्ध्या भरतं भजध्वं
शुश्रूषणं तद्भरणं प्रजानाम् ॥ **20** ॥

भूतेषु वीरुद्भ्य उदुत्तमा ये
सरीसृपास्तेषु सबोधनिष्ठाः।
ततो मनुष्याः प्रमथास्ततोऽपि
गन्धर्वसिद्धा विबुधानुगा ये ॥ **21** ॥

देवासुरेभ्यो मघवत्प्रधाना
दक्षादयो ब्रह्मसुतास्तु तेषाम्।

भवः परः सोऽथ विरिञ्चवीर्यः
स मत्परोऽहं द्विजदेवदेवः ॥ 22 ॥

न ब्राह्मणैस्तुलये भूतमन्यत्
पश्यामि विप्राः किमतः परं तु।
यस्मिन्नृभिः प्रहुतं श्रद्धयाह -
मश्नामि कामं न तथाग्निहोत्रे ॥ 23 ॥

धृता तनूरुशती मे पुराणी
येनेह सत्त्वं परमं पवित्रम्।
शमो दमः सत्यमनुग्रहश्च
तपस्तितिक्षानुभवश्च यत्र ॥ 24 ॥

मत्तोऽप्यनन्तात्परतः परस्मात्
स्वर्गापवर्गाधिपतेर्न किञ्चित्।
येषां किमु स्यादितरेण तेषा -
मकिञ्चनानां मयि भक्तिभाजाम् ॥ 25 ॥

सर्वाणि मद्धिष्ण्यतया भवद्भि -
श्चराणि भूतानि सुता ध्रुवाणि।
सम्भावितव्यानि पदे पदे वो
विविक्तदृग्भिस्तदुहार्हणं मे ॥ 26 ॥

मनोवचोदृक्करणेहितस्य
साक्षात्कृतं मे परिबर्हणं हि।
विना पुमान् येन महाविमोहात्
कृतान्तपाशान्न विमोक्तुमीशेत् ॥ 27 ॥

श्रीशुक उवाच
एवमनुशास्यात्मजान् स्वयमनुशिष्टानपि

लोकानुशासनार्थं महानुभावः परमसुहृद् -
भगवानृषभापदेश उपशमशीलाना -
मुपरतकर्मणां महामुनीनां भक्तिज्ञान -
वैराग्यलक्षणं पारमहंस्यधर्ममुपशिक्षमाणः
स्वतनयशतज्येष्ठं परमभागवतं
भगवज्जनपरायणं भरतं धरणिपालनाया -
भिषिच्य स्वयं भवन एवोर्वरितशरीरमात्र -
परिग्रह उन्मत्त इव गगनपरिधानः
प्रकीर्णकेश आत्मन्यारोपिताहवनीयो
ब्रह्मावर्तात्प्रवव्राज ॥ **28** ॥

जडान्धमूकबधिरपिशाचोन्मादकवदवधूतवेषो -
ऽभिभाष्यमाणोऽपि जनानां गृहीतमौन -
व्रतस्तूष्णीं बभूव ॥ **29** ॥

तत्र तत्र पुरग्रामाकरखेटवाटखर्वटशिबिरव्रजघोष -
सार्थगिरिवनाश्रमादिष्वनुपथमवनिचरापसदैः
परिभूयमानो मक्षिकाभिरिव वनगजस्तर्जनताडना -
वमेहनष्ठीवनग्रावशकृद्रजःप्रक्षेपपूति -
वातदुरुक्तैस्तदविगणयन्नेवासत्संस्थान
एतस्मिन् देहोपलक्षणे सदपदेश उभयानुभव -
स्वरूपेण स्वमहिमावस्थानेनासमारोपिता -
हम्ममाभिमानत्वादविखण्डितमनाः पृथिवीमेकचरः
परिबभ्राम ॥ **30** ॥

अतिसुकुमारकरचरणोरःस्थलविपुलबाह्वंसगलवदना -
द्यवयवविन्यासः प्रकृतिसुन्दरस्वभावहाससुमुखो
नवनलिनदलायमानशिशिरतारारुणायतनयनरुचिरः

सदृशसुभगकपोलकर्णकण्ठनासो विगूढस्मितवदन -
महोत्सवेन पुरवनितानां मनसि कुसुमशरासनमु -
पदधानः परागवलम्बमानकुटिलजटिलकपिशकेश -
भूरिभारोऽवधूतमलिननिजशरीरेण ग्रहगृहीत
इवादृश्यत ॥ **31** ॥

यर्हि वाव स भगवान् लोकमिमं योगस्याद्धा
प्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्म बीभत्सितमिति
व्रतमाजगरमास्थितः शयान एवाश्नाति पिबति
खादत्यवमेहति हदति स्म चेष्टमान उच्चरित
आदिग्धोद्देशः ॥ **32** ॥

तस्य ह यः पुरीषसुरभिसौगन्ध्यवायुस्तं देशं
दशयोजनं समन्तात् सुरभिं चकार ॥ **33** ॥

एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः शयानः
काकमृगगोचरितः पिबति खादत्यवमेहति स्म ॥ **34** ॥

इति नानायोगचर्याचरणो भगवान् कैवल्यपतिर्ऋष -
भोऽविरतपरममहानन्दानुभव आत्मनि सर्वेषां
भूतानामात्मभूते भगवति वासुदेव आत्मनोऽव्यव -
धानानन्तरोदरभावेन सिद्धसमस्तार्थपरिपूर्णो
योगैश्वर्याणि वैहायसमनोजवान्तर्धानपरकाय -
प्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नाञ्जसा
नृप हृदयेनाभ्यनन्दत् ॥ **35** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे ऋषभदेवानुचरिते पञ्चमोऽध्यायः ॥